# ।।महर्षि पतञ्जलि संस्कृत संस्थान भोपाल।।

प्रश्नबैंक सत्र 2024–25

## कक्षा (10वीं) पूर्वमध्यमा द्वितीय वर्ष

विषयः–वेदः (परम्परागत) विषयकोड–1011

अतिलघूत्तरीयप्रश्नाः

1. वेदस्य अर्थः कः ?
2. यजुर्वेदस्य प्रतिपाद्यविषयः कोऽस्ति ?
3. वेदस्य मुखं किम् ?
4. माध्यन्दिन् शाखायां अध्यायाः सन्ति ?
5. वेदाः कति सन्ति ?
6. यजुर्वेदस्य उपवेदः अस्ति–
7. सप्तदशाध्याये मंत्राः सन्ति ?
8. वेदांगानि भवन्ति–
9. एकोनविंशत्यध्याये मंत्राः सन्ति ?
10. द्वादशाध्यायेकति मंत्राः सन्ति ?
11. अष्टादशाध्याये मंत्राः सन्ति ?
12. शुक्लयजुर्वेदे कति शाखाः सन्ति ?
13. शुक्लयजुर्वेदस्यैकादशाध्याये मन्त्राः सन्ति ?
14. वज्रः कस्य आयुधः ?
15. चतुर्दशाध्याये मंत्राः सन्ति ?
16. शुक्लयजुर्वेदः–पद्यात्मकः,गद्यात्मकः,उभयात्मको वा अस्ति ?

17. माध्यन्दिन्शाखा– अस्ति ? यजुर्वेदे, ऋग्वेदे, सामवेदे

18. शुक्लयजुर्वेदे सन्ति–श्लोकाः, मंत्राः, आख्यायिका ?

19. त्रयोदशाध्याये मंत्राः सन्ति ?

20. पंचदशाध्याये मंत्राः सन्ति ?

21. निरूक्तः वेदस्य कस्मिन् अंगे विद्यमानः वर्तते ?

22. विश्वसाहित्यस्य प्राचीनतमः ग्रन्थः कोऽस्ति ?

23. वेदस्य शाब्दिकं अर्थं किम् ?

24. सर्वप्राचीनः वेदः कः ?

25. शुक्लयजुर्वेदस्य ब्राह्मणग्रन्थः कः ?

26. शुक्लयजुर्वेदस्य आरण्यकः कोऽस्ति ?

27. षोडशाध्याये मंत्राः सन्ति ?

28. शन्नः कुरूप्रजाभ्यः, इयं सूक्तिः कस्मिन् वेदे वर्तते ?

29. महीधरः कः आसीत् ?

30. आकृष्णेन रजसावर्तमानो निवेशयन्नमृतंमर्त्यंच, अयं मंत्रः, केन वेदेन सह सम्बध्दोऽस्ति ?

31. विंशाध्याये मंत्राः सन्ति ?

32. उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत अयं कस्योपनिषदः मंत्रः ?

33. वेदेषु कति स्वराः सन्ति ?

34. शतपथब्राह्मणस्य रचयिता कः ?

35. वेदानां स्वरूपं ज्ञातुं कः सहायकोऽस्ति ?

36. वैदिकसाहित्यस्य विभागः कति भागेषु अस्ति ?

37. वेदः नित्यो वा अनित्यो वा ?

38. घृतमुखं कस्य देवस्य संज्ञा ?

39. जातवेदः कस्य निर्वचनं अस्ति ?

40. वाजसनेयी संहितायां कति मंत्राः सन्ति ?

41. संहिताशब्दः कस्य बोधक :अस्ति ?

42. यज्ञे यजुर्वेदस्य मंत्राणां पाठकर्तुः नाम किम् ?

43. शिवसंकल्पसूक्तं कस्मिन् वेदे अस्ति ?

44. माध्यन्दिन्शाखायाः शतपथब्राह्मणग्रन्थे कति काण्डाः सन्ति ?

45. शतपथब्राह्मणग्रंथे राजसूयज्ञेन सम्बद्धः काण्डः कः ?

46. शुक्लयजुर्वेदस्य उपनिषद्ग्रन्थानां संख्याः सन्ति ?

47. त्रिष्टुप्छनदे वर्णानां संख्याः भवति ?

48. षोडशसंस्काराः कस्मिन् सूत्रे सन्ति ?

49. वृहदारण्यकोपनिषद् कति अध्यायेषु विभक्तम् ?

50. ''सत्यमेवजयते'' कस्मिनुपनिषदि विहितः ?

51 ॐ युञ्जानः प्रथमम्, अयं मंत्रः एकादशाध्यायस्य प्रथमः मंत्रः अस्ति ?

(सत्य / असत्य)

52. शुक्लयजुर्वेदस्य षोडशाध्याये प्रथममंत्रतः पञ्चमंत्रपर्यन्तं रूद्रदेवस्य उपासनायाः वर्णनम् अस्ति ? (सत्य / असत्य)

53. शुक्लयजुर्वेदे षोडशाध्याये षष्ठे मंत्रे दिक्षुषु विस्तरि शक्तयः सन्ति।

(सत्य / असत्य)

54. षोडशाध्याये रक्षार्थं रूद्रदेवस्य प्रार्थना अस्ति ? (सत्य / असत्य)

55. षोडशाध्याये सप्तदशमंत्रतः षड्चत्वारिंशत् मन्त्रपर्यन्तं गणपत्यादिदेवानां स्तुतिर्नास्ति। (सत्य / असत्य)

56. षोडशाध्याये रूद्रदेवस्य स्वरूपनिरूपणं न विद्यते ? (सप्तचत्वारिंशत् तः चतुः षष्टिमंत्रपर्यंतम्) (सत्य / असत्य)

57. द्वादशाध्याये एकोननवतिः संख्याकमंत्रे याः फलनीर्याऽअफला इति मंत्रः नास्ति ? (सत्य / असत्य)

58. त्रयोदशाध्याये षड्मंत्रतः अष्टमंत्रपर्यंतं सर्पाणां स्तुतिर्नास्ति ? (सत्य / असत्य)

59. अष्टादशाध्याये यज्ञस्य सर्वविधफलीभूतहेत्वर्थं कामना अस्ति ? (सत्य / असत्य)

60. अष्टादशाध्याये व्वाजश्च्चमे प्रसवश्च्चमे, अयं मंत्रः प्रथमः मंत्रोऽस्ति ? (सत्य / असत्य)

61. ऊक्क्र्चमेसूनृताचमे,अस्य मंत्रस्य पञ्चामृतस्नानाय देवानां पूजने प्रयोगो भवति (सत्य / असत्य)

62. शुक्ल यजुर्वेदः पद्यात्मकः अस्ति ? (सत्य / असत्य)

63. विश्वसाहित्यस्य प्राचीनतमः ग्रन्थः ऋग्वेदः अस्ति ? (सत्य / असत्य)

64. वेदे गायत्री छन्दः विद्यते ? (सत्य / असत्य)

65. वेदस्य अयनं ज्योतिषं अस्ति ? (सत्य / असत्य)

66. वेदाध्यायी सदाशिवः ? (सत्य / असत्य)

67. अरून्धती कस्य पत्नी आसीत् ?

68. सामवेदस्य ऋत्विजः कः आसीत् ?

69. अथर्ववेदस्य ऋत्विजः कः आसीत् ?

70. कृष्णयजुर्वेदस्य ब्राह्मणग्रन्थः कः ?

71. एकादशाध्याये कतिमन्त्राः सन्ति ?

## लघूत्तरीयप्रश्नाः

1. वेदेषु केषां विषयाणां समावेशाः सन्ति ?
2. के चत्वारः वेदाः ?
3. ऋत्विजः कति भवन्ति ? तेषां नामानि लिखत–
4. कृष्णयजुर्वेदस्य कति शाखाः सन्ति? तेषां नामानि लिखत–
5. वेदांगाः के ? तेषां नामानि लिखत–
6. वैदिकछन्दांसि मुख्यतः कतिसन्ति ? तेषां नामानि लिखत–
7. असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। अयं मंत्रः कुत्र विद्यते ? अस्य भावार्थोऽपि लेख्यः।
8. वेदेषु प्रयुक्तप्रमुखछन्दः कः ? तस्योदाहरणपूर्वकं उल्लेखं कुरूत–
9. नमस्तेरूद्रमन्यवउतोतइषवेनमः अयं मंत्रः कुत्र वर्तते ? मंत्रं च पूरयेत–
10. दशमण्डलानिकस्मिन् वेदे वर्तन्ते?तस्यादिमं मंत्रं लिखत–
11. वाजसनेयीसंहितायां कतिमंत्राः सन्ति ? शब्देषु अंकेषु च लिखत–
12. यजुष् शब्दस्य अर्थः कः ? विस्तरेण लिखत–
13. महर्षिपतंजलिना महाभाष्ये यजुर्वेदस्य कतिशाखानां वर्णनं कृतम् ? अधुना उपलब्धानां शाखानां नामानि लिखत–
14. कूर्मपुराणे यजुर्वेदस्य कति शाखानामुल्लेखःअस्ति?
15. शौनकस्य चरणव्यूहानुसारं यजुर्वेदस्य कतिशाखाः सन्ति ? कानि च तेषां नामानि–
16. शुक्लयजुर्वेदस्य द्वादशाऽध्याये षड्नवति संख्याकः मंत्रः कस्य मंत्रः अस्ति ? मंत्रं लिखत–

## यथायोग्यं योजयत

| | | |
|---|---|---|
| 17. त्वांगन्धर्वाऽअखनँस्त्वा | – | द्रव्यदक्षिणामंत्रः |
| 18. ब्रह्मयज्ञानम्प्रथमं | – | गन्धस्य मंत्रः |
| 19. हिरण्यगर्भःसमवर्तताग्रे | – | ब्रह्मावाहनमंत्रः |
| 20. नमोऽस्तु सर्पेभ्योयेकेच | – | दूर्वामंत्रः |
| 21. अग्निर्मूर्धादिवः ककुत्पतिः | – | मंगलमावाहनमंत्रः |
| 22. काण्डात्काण्डात्प्ररोहन्ति | – | सर्पावाहनमंत्रः |
| 23. महीद्यौः पृथिवीचन | – | मधुस्नानाय मंत्रः |
| 24. मधुव्वाताऋतायते | – | पृथिव्यावाहनमंत्रः |
| 25. अग्निर्ज्ज्योतिषांज्योतिष्मा | – | बुधग्रहावाहनमंत्रः |
| 26. अग्निर्देवताव्वातोदेवतासूर्यो | – | दीपस्य मंत्रः |
| 27. उद्बुद्ध्यस्वाग्ने | – | रूद्रदेवस्य मंत्रः |
| 28. नमस्तेरूद्रमन्यवउतोत | – | सर्वेषांदेवानां प्रार्थनामंत्रः |
| 29. आशुः शिशानोव्वृषभोनभीमो | – | पंचामृतस्नानायमंत्रः |
| 30. उक्क्र्चमेसूनृताचमेपयश्श्चमे | – | नन्द्यावाहनमंत्रः |
| 31.1 क्षत्रस्ययोनिरसि | – | एकादशाध्यायस्य प्रथममंत्रः |
| 2 पुनन्तुमादेवजनाः | – | अष्टपंचाशत |
| 3 युंजानः | – | सप्तदशाधिकंएकशतं |
| 4 द्वादशाध्याये मंत्राः | – | पुनन्तुमनसाधियः |
| 5 त्रयोदशाध्याये मंत्राः | – | क्षत्रस्यनाभिरसि |

रिक्तस्थानानिपूरयन्तु

31. येतीर्त्थानिप्रचरन्ति...........................निषंगिणः। तेषांसहस्रयोजने............ नितन्न्मसि ।।

32. नमःशम्भवाय.............नमः 'शंकरायच..............च नमः..........शिवतरायच।।

33. नमोगणेभ्यो................व्व्रातेब्भ्योव्व्रातपति.................गृत्सेभ्योगृत्सपति........ विश्वरूपेब्भ्यश्श्च वोनमः।।

34. मानस्तो के..........अश्वेषुरीरिषः मानोव्वीरान्नुद्रभा..........सदमित्वाहवामहे।।

35. सत्त्यञ्चमेश्रद्‌द्धाचमे...............महश्च्चमेक्क्रीडाचमे.........जनिष्यमाणञ्चमे ...........यज्ञेनकल्प्पन्ताम्।।

36. पयःपृथिव्व्याम्पयऽ................यन्तरिक्षेपयोधाः। पयस्वतीप्रदिशः..............।।

37. बुधग्रहमावाहन मत्रः, गणपतिध्यान मत्रः,इन्द्रावाहन मंत्रः,भौमावाहन मंत्रः नैवेद्य मंत्रः,फलस्य मंत्रः केन सह सम्बद्धः अस्ति ?

क उदबुध्यस्वाग्ने ......यजमानश्च सीदत । मंत्रः अस्ति..............?

ख नमोगणेभ्यो.......रुपेब्भ्यश्चवोनमः । मंत्रः अस्ति..............?

ग याःफलिनीर्या........मुंचन्त्वं हसः । मंत्रः अस्ति..............?

घ अग्निमूर्ध्दा.........सिजिन्वति । मंत्रः अस्ति..............?

ड त्रातारमिन्द्रं......धात्विन्द्रः । मंत्रः अस्ति..............?

38. एकादशाध्यायस्य अन्तिमः मंत्रः कोऽस्ति ?
नाब्भ्याआसी। अन्नपतेनस्य। मंत्रं प्रपूर्यताम्–

39. आदिवेदः कः ? प्रथममण्डलस्य प्रथमसूक्तस्य नामं लिखत–

39. सुपर्णोसिगरूत्मॉस्त्रिवृत्ते, अयं मंत्रः कस्मिन् अध्याये विहितः ? प्रश्ने लिखितस्य पदस्य स्वरो लेखं कुरूत–

40. त्वान्धर्व्वाऽअखनंस्त्वा, अयं मंत्रः कस्मिन् अध्याये विहितः ? प्रश्ने लिखितस्य पदस्य स्वरो लेखं कुरूत–

41. नमस्तेरूद्रमन्न्यवऽउतोत, अयं मंत्रः कस्मिन् अध्याये विहितः ? प्रश्ने लिखितस्य पदस्य स्वरो लेखं कुरूत–

42. नमोस्तुरूद्रेभ्योयेदिवियेषां, अयं मंत्रः कस्मिन् अध्याये विहितः ? प्रश्ने लिखितस्य पदस्य स्वरो लेखं कुरूत–

43. मर्म्माणितेव्वर्म्मणाच्छादयामिसोमस्त्वा, अयं मंत्रः कस्मिन् अध्याये विहितः ? प्रश्ने लिखितस्य पदस्य स्वरो लेखं कुरूत–

44. व्वाजश्च्चमेप्रसवश्च्चमे, अयं मंत्रः कस्मिन् अध्याये विहितः ? प्रश्ने लिखितस्य पदस्य स्वरो लेखं कुरूत–

45. वाजायस्वाहाप्प्रसवायस्वाहापिजायस्वाहा, अयं मंत्रः कस्मिन् अध्याये विहितः ? प्रश्ने लिखितस्य पदस्य स्वरो लेखं कुरूत–

46. व्व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोति, अयं मंत्रः कस्मिन् अध्याये विहितः ? प्रश्ने लिखितस्य पदस्य स्वरो लेखं कुरूत–

47. पितृब्भ्यःस्वधायिब्भ्यःस्वधानमः, अयं मंत्रः कस्मिन् अध्याये विहितः ? प्रश्ने लिखितस्य पदस्य स्वरो लेखं कुरूत–

48. ॐक्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसि, अयं मंत्रः कस्मिन् अध्याये विहितः ? प्रश्ने लिखितस्य पदस्य स्वरो लेखं कुरूत–

49. अश्विनापिबताम्मधुसरस्वत्या,अयंमंत्रः कस्मिन् अध्याये विहितः ? प्रश्ने लिखितस्य पदस्य स्वरो लेखं कुरूत–

50. एकादशाध्यायतःविंशत्यध्यायपर्यंतं कमपि मंत्रं लिखन्तु –

51. यज्ञप्रधानवेदः कः ? तस्य विषये पंचशब्दान् लिखत–

52. यज्ञोवैश्रेष्ठतमंकर्मवाक्यमिदं कस्य ब्राह्मणग्रन्थस्य ? अस्य वाक्यस्य भावार्थोऽपि लेख्यः–

53. शतपथब्राह्मणस्य कस्मिन् काण्डे–अग्निहोत्रस्य, पिण्डपितृयज्ञस्य, आग्रायणस्य, चातुर्मास्यस्य च वर्णनम् अस्ति ? संख्यां नाम च लिखत–

54. पाठकस्यगुणाःपाणिनीशिक्षानुसारं विलिख्यताम्–

55. वाजसनेयी प्रातिशाख्यस्य रचनाकारः कः ? प्रातिशाख्यस्य आदितः पंच सूत्रान् च लिखत–

56. वेदानां रक्षणार्थम् अध्येयं व्याकरणम्

अथवा

लोपागमवर्णविकारज्ञोहिसम्यग् वेदान् परिपालयिष्यतीति।। अस्यकोऽर्थः।

57. वेदाषुज्योतिषशास्त्रस्य प्रथमाचार्यःकः?अन्येषां पंचाचार्याणां च नामानि लिखत–

58. अबोद्ध्यग्निः समिधाजानानाम् मंत्रः कस्मिन् प्रयोजने प्रयुक्तः, इति लिखन्तु मंत्रं च पूरयन्तु।

59. नमोबिल्मिनेचकवचिने, मंत्रः अस्ति पंचदशाध्याये अथवा षोडशाध्याये ? मंत्रं च पूरयन्तु।

60. यत्रबाणाः सम्पतन्तिकुमाराव्विशिखाऽइव। इति मंत्रं प्रपूर्यताम्।

61. सत्यंचमे श्रद्द्धाचमे जगच्चमे इति मंत्रं प्रपूर्यताम्–

62. बृहस्पतेपरिदीयारथेनरक्षोहामित्रॉइतिमंत्रं प्रपूर्यताम्–

63. प्रमुंचधन्वनस्त्वमुभयोइतिमंत्रं प्रपूर्यताम्–

64. मानोमहान्तमुतमानोइतिमंत्रं प्रपूर्यताम्–

65. अग्निर्द्देवताव्वातोदेवतासूर्योदेवताचन्द्रमादेवताइतिमंत्रं प्रपूर्यताम्–

66. माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः। धैर्यं लयसमर्थंच षडेते पाठकाः गुणाः।। अस्य श्लोकस्य हिन्दीभाषायां अनुवादो विधेयः ?

## दीर्घोत्तरीयप्रश्नाः

1. शुक्लयजुर्वेदस्य कण्ठस्थीकृत मन्त्रौसस्वरौलेख्यौ।
2. शुक्लयजुर्वेदस्य एकादशाध्यायस्य प्रथमोमन्त्रः लेख्यः
3. व्वाजायस्वाहाप्प्रसवायस्वाहापिजायस्वाहा,मंत्रमिमं सम्पूर्य सस्वरं लिखत–
4. अधोलिखितमन्त्रद्वयं लिखत–

    1 त्वांवान्धर्वाऽअखनॅस्त्वा

    2 शिवेन्नव्वचसात्वागिरिशाच्छा

    3 असौयस्ताम्म्रोऽअरूणऽउतबब्भ्रुः

    4 नमःसभाभ्यःसभापतिब्भ्यश्च्चवोनमो

5. षोडशाध्यायस्य षोडषं मंत्रं सस्वरं लिखत–
6. द्वादशाध्यायस्य प्रथमं मंत्रं लिखत–
7. त्रयोदशाध्यायस्य तृतीयं मंत्रं लिखत–
8. चतुर्दशाध्यायस्य प्रथमं मंत्रं लिखत–
9. पंचदशाध्यायस्य प्रथमं मंत्रं लिखत–
10. षोडषाध्यायस्य कानपिमंत्रत्रयं विलिख्य ससंदर्भव्याख्यां कुरूत–
11. सप्तदशाध्यायस्य त्रयस्त्रिंशत् मंत्रतः एकोनपचांशत्मन्त्रपर्यन्तं यथेच्छंद्वौ मन्त्रौ सस्वरौ विलिख्य ससंदर्भव्याख्यां कुरूत–
12. अष्टादशाध्यास्य मंत्रद्वयं विलिख्य ससंदर्भव्याख्यां कुरूत।
13. विंशत्यध्यायस्य प्रथमं मंत्रं सस्वरं लिखत–
14. अष्टविकृतीनां लक्षणानि लिखित्वा कापि एकाविकृतिर्लेखनीया ।
15. वेदानां नामानि उल्लिख्य कस्यापि एकस्य सविस्तरं वर्णनं कुरूत–

16. पारस्करगृह्यसूत्रानुसारेणमानवजीवनेकतिसंस्काराःभवन्ति?
एकस्य सविस्तरं वर्णनं कुरूत–

17. शुक्लयजुर्वेदेपर्यावरणं इत्यस्मिन्विषये शतशब्देषु निबंन्धं लिखत–

18. वेदानांमहत्वम् इतिविषये शतशब्देषुनिबंन्धं लिखत–

19. वैदिकव्याकरणं इत्यस्मिन् विषयेषु पंचाशतशब्दैःलिखत–

20. वेदभाष्यकारेषु केषाञ्चित्पञ्चानां नामानिलिखन्तु–

21. कस्यापि एकस्य धर्मसूत्रस्य वर्णनंकुरूत–

22. पदपाठस्य नियमंविलिख्यताम्–

23. विश्व संहित्यस्य प्राचीनतमःग्रन्थः कोऽस्ति?

24. शुक्लयजुर्वेदस्य पाठयक्रमानुसारं कण्ठस्थीकृत द्वौ मन्त्रौ सस्वरौ लेख्यौ।

25. को पि द्वौ मन्त्रौ सस्वरौ विलिख्य व्याख्यां कुरुत–

26. यजुर्वेदस्य प्रतिपाद्य विषयःअस्ति कर्मकाण्डं अस्मिन् विषये निबन्धं लिखत–

27. यज्ञप्रधान वेदःकः पंचाशत शब्दान् लिखत–

28. गायत्री मन्त्रे कति वर्णाः सन्ति कतिपदाश्च सन्ति क्रमेण लिखत–

29. पाठयक्रमानुसारं प्रत्येक अध्यायस्य अन्तिमं मन्त्रं लिखत–

30. आयुर्यज्ञेनकल्पताम्प्राणोयज्ञेनकल्पताम् इति मन्त्रं प्रपूर्यताम्।

प्रश्नबैंक निर्माताः–

अनन्त कुमार मिश्र(माध्यमिक शिक्षकः)

संपर्क सूत्रः–**91798710689** ई–मेलः–**anantkumarmishra2@gmail.com**

शास0हाईस्कूल लखनवाड़ा सिवनीमण्डलं मध्यप्रदेश